"तस्मिन् महन्मुखरिता मधुभिच्चरित्र-
पीयूषशेषसरित: परित: स्रवन्ति ॥")

मधुमक्षिका, स्त्री, ( मधुसञ्चायिका मक्षिका।) कीटविशेष:। मौमाछी इति भाषा। तत्पर्य्याय:। सरघा २। इत्यमर:। २। ५। २६॥

मधुमज्जा, [न्] पुं, ( मधुर्मधुरो मज्जा यस्य। ) आखोटवृक्ष:। इति राजनिर्घण्ट:॥

मधुमती, स्त्री, ( मधुर्मधुररसोऽस्त्यस्येति मतुप्। ङीप्। ) काश्मरीवृक्ष:। नदीविशेष:। तस्या जलगुणा:। यथा, राजनिर्घण्टे।

"चन्द्रभागागुणसाम्यदं जलं
किञ्च माधुमतमग्निदीपनम्॥"

उपास्यनायिकाविशेष:। यथा,—

"तथा मधुमती सिद्धिर्जायते नात्र संशय:।
देवचेटी शतशतं तस्य वश्या भवन्ति ह ॥
स्वर्गे मर्त्ये च पाताले स यत्र गन्तुमिच्छति।
तत्रैव चेटिका: सर्व्वा नयन्ति नात्र संशय:॥"
इति कुलार्णवदीपिकायां ३ पटल:॥

( छन्दोभेद:। अस्या लक्षणं यथा, छन्दोमञ्जर्य्याम्। २। १।

"ननगि मधुमती।" अधिकं छन्द:शब्दे द्रष्टव्यम्॥ समाधिसिद्धिभेद:। यथा, सर्व्वदर्शनसंग्रहे पातञ्जलदर्शने। "तत्र मधुमती नामाभ्यासवैराग्यादिवशादपास्तरजस्तमोलेशसुखप्रकाशमयसत्त्वभावनयानवद्यवैशारद्यविद्योतनरूपऋतम्भरप्रज्ञाख्या समाधिसिद्धि:॥ गङ्गा। यथा, काशीखण्डे। २९। १३३।

"महोदया मधुमती महापुण्या सुदाकरी॥"

इक्ष्वाकुपुत्त्रहर्य्यश्वस्य भार्य्या सा च मधोर्दैत्यस्य सुता। यथा, हरिवंशे। ९३। १२--१३।

"आसीद्राजा मनोर्वंशे श्रीमानिक्ष्वाकुसम्भव:।
हर्य्यश्व इति विख्यातो महेन्द्रसमविक्रम:॥
तस्यासीद्दयिता भार्य्या मधोर्दैत्यस्य वै सुता।
देवी मधुमती नाम यथेन्द्रस्य शची तथा।"

मधुरसविशिष्टे, त्रि। यथा, ऋग्वेदे। ७।६९।३।

"स्वश्वायशसायातमर्व्वाग् दस्रानिधिं मधुमन्तं
पिवाथ:॥")

मधुमथन:, पुं, ( मधुं तन्नामानं दैत्यं मथ्नातीति। मन्थ+ल्यु।) विष्णु:। इति हलायुध:॥ (यथा, भागवते। ६। ९। ३९।

"सर्व्वात्मनि निरतनिर्वृतमनस: कथमुह वा एते मधुमथन! पुन: स्वार्थकुशला ह्यात्मप्रियसुहृद: साधवस्त्वच्चरणाम्बुजानुसेवां विसृजन्ति न यत्र पुनरयं संसारपर्य्यावर्त्त:॥")

मधुमल्ली, स्त्री, ( मधुप्रधाना मल्ली। ) मालती। इति शब्दमाला॥

मधुमस्तकं, क्ली, ( मधुर्मधुररस: मस्तके उपरिभागे यस्य। ) पिष्टकविशेष:। यथा,—

"मधुतैलघृतैर्मध्ये वेष्टिता: समिताश्च या:।
मधुमस्तकमुद्दिष्टं तस्याख्यापरिमार्ज्जनम्॥"
इति शब्दचन्द्रिका॥

अस्य गुणा: पिष्टशब्दे द्रष्टव्या:॥

मधुमाध्वीकं, क्ली, (मधु माधुर्य्ययुक्तं माध्वीकम्।) मद्यम्। इत्यमरटीकायां भरत:॥

मधुमारक:, पुं, ( मधूनां मारक:। भक्षकत्वात्तथात्वमस्य। ) भ्रमर:। इति राजनिर्घण्ट:॥

मधुमूलं, क्ली, ( मधु मधुरं मूलम्। ) आलुकम्। इति शब्दचन्द्रिका। मौ आलु इति भाषा॥

मधुयष्टि:, स्त्री, ( मधुर्मधुरा यष्टि:।) इक्षु:। इति शब्दचन्द्रिका॥

मधुयष्टिका, स्त्री, ( मधुर्मधुरा यष्टि:। तत: कन् टाप्। ) यष्टिमधु। तत्पर्य्याय:। मधुकम् २ क्लीतकम् ३ यष्टिमधुका ४। इत्यमर:। २। ४। १०९॥ मधुयष्टी ५। इति भरत:॥ (तथास्या: पर्य्यायान्तरम्।

"यष्ट्याह्वं मधुकं यष्टि क्लीतकं मधुयष्टिका।
यष्टिमधु स्थले जाता जलजातिरसा पुरा॥"
इति वैद्यकरत्नमालायाम्॥)

मधुयष्टी, स्त्री, ( मधुयष्टि। कृदिकारादिति पक्षे ङीष्। ) मधुयष्टिका। इति शब्दमाला॥

मधुरं, क्ली, ( मधु+र:। ) वङ्गम्। इति राजनिर्घण्ट:॥ विषम्। इति मेदिनी। रे, १९५॥ (वङ्गशब्दे विषशब्दे च विवरणमस्य ज्ञातव्यम्॥)

मधुर:, पुं, ( मधु माधुर्य्यं रातीति। रा+क:। यद्वा, मधुमाधुर्य्यमस्यास्तीति। "ऊषसुषिमुष्कमधो र:।"५।२।१०७। इति र:।) मिष्टरस:। इत्यमर:। १। ५। ९॥ स च इक्ष्वादौ लक्ष्यते। तत्पर्य्याय:। गौल्य: २। इति राजनिर्घण्ट:॥ रसज्येष्ठ: ३ गुल्य: ४ स्वादु: ५ मधूलक: ६। इति हेमचन्द्र:। ६।२४॥ तस्य गुणा:। प्रीणनत्वम्। बल्यत्वम्। बृंहणत्वम्। वायुपित्तनाशित्वम्। रसायनत्वम्। गुरुत्वम्। स्निग्धत्वम्। चक्षुष्यत्वम्। तर्पणत्वम्। सरत्वञ्च। अन्यच्च।

"रसो मधुरक: शीतो धातुस्तन्यबलप्रद:।
चक्षुष्यो वातपित्तघ्न: कुर्य्यात् स्थौल्यकफक्रमीन्॥
सोऽतियुक्तो ज्वरश्वासगलगण्डादिरोगकृत्॥"
इति राजवल्लभ:॥

अपि च।

"मधुरस्तु रसश्चिनोति केशान्
वपुष: स्थैर्य्यबलौजोवीर्य्यदायी।
अतिसेवनत: प्रमेहशैत्य-
जड़तामान्द्यसुखान् करोति दोषान्॥"
इति राजनिर्घण्ट:॥

( यथा च वाभटे सूत्रस्थाने दशमेऽध्याये॥

"रसानामिति रूपाणि कर्म्माणि मधुरो रस:।
आजन्मसात्म्यात् कुरुते धातूनां प्रबलं बलम्।
बालवृद्धक्षतक्षीणवर्णकेशेन्द्रियौजसाम्॥
प्रशस्तो बृंहणो कण्ठ्य: स्तन्यसन्धानकृद्गुरु:।
आयुष्यो जीवन: स्निग्ध: पित्तानिलविषापह:॥
कुरुतेऽत्युपयोगेन समेद:कफजान् गदान्।
स्थौल्याग्निसादसंन्यासमेहगण्डार्ब्बुदादिकान्॥"

अपिच।

"तत्र मधुरो रस: शरीरसात्म्याद्रसरुधिरमांसमेदोऽस्थिमज्जौज:शुक्राभिवर्द्धन आयुष्य: षड़िन्द्रियप्रसादनो बलवर्णकर: पित्तविषमारुतघ्नस्तृष्णाप्रशमन: त्वच्य: केश्य: कण्ठ्य: प्रीणनो जीवनस्तर्पण: स्नेहन: स्थैर्य्यकर: क्षीणक्षतसन्धानकर: घ्राणमुखकण्ठौष्ठतालुप्रह्लादनो दाहमूर्च्छाप्रशमन: षट्पदपिपीलिकानामिष्टतम: स्निग्ध: शीतो गुरुश्च।

स एवंगुणोऽप्येक एवात्यर्थमुपयुज्यमान: स्थौल्यं मार्द्दवमालस्यमतिस्वप्नं गौरवमनन्नाभिलाषमग्नेर्दौर्बल्यमास्यकण्ठमांसाभिवृद्धिं श्वासकासप्रतिश्यायालसकशीतज्वरानाहास्यमाधुर्य्यवमथुसंज्ञास्वरप्रणाशगलगण्डमालाश्लीपदगलशोफवस्तिधमनीगुदोपलेपाक्ष्यामयानभिष्यमित्येवंप्रभृतीन् कफजान् विकारानुपजनयन्ति।

"स्नेहनप्रीणनाह्लादमार्द्दवैरुपलभ्यते।
मुखस्थो मधुरश्चास्यं व्याप्नुवँल्लिम्पतीव च॥"
इति चरके सूत्रस्थाने २६ अध्याये॥)

जीवक:। रक्तशिग्रु:। राजाम्र:। रक्तेक्षु:। गुड़:। शालि:। इति च राजनिर्घण्ट:॥ (वीजपूरविशेष:। तत्पर्य्यायो यथा,—

"वीजपूरोऽपर: प्रोक्तो मधुरो मधुकर्कटी।"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे॥

स्कन्दस्य सैनिकभेद:। यथा महाभारते। ९। ४५। ६९।

"मधुर: सुप्रसादश्च किरीटी च महाबल:॥")

मधुर:, त्रि, (मधु माधुर्य्यमस्यास्तीति। "ऊषसुषिमुष्कमधो र:।" ५। २। १०७। इति र:।) मधुररसविशिष्ट:। स्वादु:। ( यथा, हितोपदेशे। १। ७९।

"न धर्म्मशास्त्रं पठतीति कारणं
न चापि वेदाध्ययनं दुरात्मन:।
स्वभाव एवात्र तथातिरिच्यते
यथा प्रकृत्या मधुरं गवां पय:॥")

प्रिय:। इति मेदिनी। रे, १९५॥ पारिभाषिकमधुराणि यथा। विदग्धोक्ति:। प्रियाधरकुचादि:। शशी। स्त्रिय:। बालोक्ति:। इति कविकल्पलता॥

मधुरक:, पुं, ( मधुर+संज्ञायां कन्। ) जीवकवृक्ष:। इत्यमर:। २। ४। १४२॥ ( यथा, सुश्रुते चिकित्सितस्थाने ४ अध्याये।

"विपचेन्मधुरकप्रतीवापम्॥" )

मधुरकण्टका, स्त्री, ( मधुरा: कण्टका यस्या:। ) मत्स्यविशेष:। तत्पर्य्याय:। कच्छली २ कच्छला ३ अनम्ला ४ माध्वी ५। इति शब्दरत्नावली॥

मधुरजम्बीर:, पुं, ( मधुरो जम्बीर:। नित्यकर्म्मधारय:। ) मधुजम्बीर:। तत्पर्य्याय:। मधुजम्भ: २ मधुजम्भल: ३ रसद्रावी ४ शर्करक: ५ पित्तद्रावी ६। अस्य गुणा:। मधुरत्वम्। शिशिरत्वम्। कफपित्तशोफशमनाशित्वञ्च। इति राजनिर्घण्ट:॥

मधुरत्वच:, पुं, ( मधुरा त्वचा यस्य। ) धववृक्ष:। इति त्रिकाण्डशेष:॥ (गुणादयोऽस्य धवशब्दे ज्ञातव्या:॥)